# श्रद्धाञ्जलिः

रेवाप्रसादो द्विवेदी

## (आचार्य–रामजी–उपाध्यायस्य देवलोकगमने 17.01.11 दिनाङ्के लिखितानि पद्यानि)

उत्साहेन महीयसा शतमसौ वर्षाणि संपूर्णतां
यातो हन्त गतिं महर्षिभिरपि प्राप्तुं तु या काम्यते।
आतिथ्ये निरतः सदैव, विरतो दैन्ये कृतौ पुस्तक–
व्रातस्यार्यचरित्र–पोषणजुषो नित्योद्यतोऽभूदसौ।।1।।
मह्यं तस्य महात्मनोऽभवदहो क्षोभोऽपि लाभाय त–
त्कोपेनाऽप्यभवन्ममातिमहती सिद्धिः, स साधूत्तमः।
यां वै सागरिकामसौ बहुतिथं कालं समापादयत्
सा वै संस्कृतभारती–हृदि विराराजत्यलं ब्रह्मवत्।।2।।
तस्यास्य राजतु यशः सितशीतभानुः
शाश्वत् सदैव विकिरन्नमृतानि दिक्षु।
गान्धी बभूव हृदि तस्य, परन्तु शास्त्री
लालोऽभवत् प्रिय उदारमतेरुदारः।।3।।
गोवंशरक्षणपरः स बभूव नित्यं
गोदुग्धसेवनदृढो लशुनाद्यभोक्ता।
यं पश्यति स्म विबुधं शिथिलं चरित्रे
तं निन्दति स्म, न च तं वृणुते स्म कृत्ये।।4।।
पुत्रः प्रियङ्कर इति प्रथितोऽर्थशास्त्री
पुत्री तथाङ्ग्लभणितौ प्रथमा वनश्रीः।
विद्यां प्रपोषयितुमेव निजेऽपि सीम्नि
स्वं संस्कृतं न हि परित्यजतः कदापि।।5।।
एवं विधं दृढं दिव्य–वाणी–संपोषणं बुधम्।
रेवाप्रसादो मूर्ध्नि स्वे मन्ये छत्रमिवास्तृतम्।।6।।

28, महामनापुरी, वाराणसी – 5

–––000–––